श्री दत्तात्रेय अष्टचक्रबीज स्तोत्रं

श्री दत्तात्रेय अष्टचक्रबीज स्तोत्रं

मूलाधारे वारिजपत्रे चतुरस्रं
वं शं षं सं वर्णविशालैः सुविशालैः |
रक्तं वर्णं श्रीगणनाथं भगवंतं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 1 ||

स्वाधिष्ठाने षड्दळपत्रे तनुलिंगे
बालां तावद्वर्णविशालैः सुविशालैः |
पीतं वर्णं वाक्पतिरूपं द्रुहिणं तं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 2 ||

नाभौपद्मे पत्रदशाब्दे ड फ वर्णे
लक्ष्मीकांतं गरुडारूढं नरवीरं |
नीलं वर्णं निर्गुणरूपं निगमांतं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 3 ||

हृत्पद्मांते द्वादशपत्रे क ठ वर्णे
सांबं शैवं हंसविशेषं शमयंतं |
सर्गस्थित्यंतं कुर्वंतं शिवशक्तिं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 4 ||

कंठस्थाने चक्रविशुद्धे कमलांते
चंद्राकारे षोडशपत्रे स्वरवर्णे |
मायाधीशं बीजशिवं तं निजरूपं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 5 ||

आज्ञाचक्रे भृकुटिस्थाने द्विदलांते
हं क्षं बीजं ज्ञानसमुद्रं गुरुमूर्तिं |
विद्युद्वर्णं ज्ञानमयं तं निटिलाक्षं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 6 ||

मूर्ध्निस्थाने वारिजपत्रे शशिबीजे
शुभ्रं वर्णं पद्मसहस्रं सुविशालं |
हं बीजाख्यं वर्णसहस्रं तुरीयांतं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 7 ||

ब्रह्मानंदं ब्रह्ममुकुंदं भगवंतं
ब्रह्मज्ञानं सत्यमनंतं भवरूपं |
पूर्णं चिद्घनपंचमखंडं शिवरूपं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 8 ||

शांताकारं शेषशयानं सुरवंद्यं
कांतानाथं कोमलगात्रं कमलाक्षं |
चिंतारत्नं चिद्घनपूर्णं द्विजराजं
दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि || 9 ||

इति श्रीमच्छंकराचार्यविरचितं अजपाजपस्तोत्रं नाम श्री दत्तात्रेय अष्टचक्रबीज स्तोत्रं |